ब्रह्मत्वममरत्वं वा सुरत्वं सुखकारणम् ।
वाञ्छन्ति निश्चलां भक्तिं मदीयामतुलामपि ॥
स्त्रीपुंविभेदो नास्त्येवं सर्व्वजीवेषु भिन्नता ।
तेषां सिद्धेश्वराणाञ्च प्रवराणां व्रजेश्वर ! ॥
क्षुत्पिपासादिकां निद्रां लोभमोहादिकं रिपुम् ।
त्यक्त्वा दिवानिशं माञ्च ध्यायते च दिगम्बरः ॥
स मद्भक्तोत्तमो नन्द ! श्रूयतां मध्यमादिकम् ॥”
“नासक्तः कर्म्मसु गृही पूर्व्वप्राक्तनतः शुचिः ॥
करोति सततञ्चैव पूर्व्वकर्म्मनिकृन्तनम् ।
न करोत्यपरं यत्नात् सङ्कल्परहितश्च यः ॥
सर्व्वं कृष्णस्य यत्किञ्चिन्नाहं कर्त्ता च कर्म्मणः ।
कर्म्मणा मनसा वाचा सततं चिन्तयेदिति ॥
न्यूनभक्तश्च तन्न्यूनः स च प्राकृतिकः श्रुतौ ।
यमं वा यमदूतं वा स्वप्नेन च न पश्यति ॥
पुरुषाणां सहस्रञ्च पूर्व्वं भक्तः समुद्धरेत् ।
पुंसां शतं मध्यमश्च तच्चतुर्थञ्च प्राकृतः ॥
भक्तश्च त्रिविधस्तात ! कथितश्च तवाज्ञया ॥”
इति तत्रैव ८४ अध्यायः ॥
कृष्णभक्तशरीरे तीर्थादीनि यथा,—
“पृथिव्यां यानि तीर्थानि पुण्यान्यपि च जाह्नवि ! ।
मद्भक्तानां शरीरेषु सन्ति पूतेषु सन्ततम् ॥
मद्भक्तपादरजसा सद्यः पूता वसुन्धरा ।
सद्यः पूतानि तीर्थानि सद्यः पूतं जगत्तथा ॥
मन्मन्त्रोपासका विप्रा ये मदुच्छिष्टभोजिनः ।
मामेव नित्यं ध्यायन्ति ते मत्प्राणाधिकाः प्रियाः ।
तदुपस्पर्शमात्रेण पूतो वायुश्च पावकः ।
कलेर्दशसहस्राणि मद्भक्ताः सन्ति भूतले ॥
एकवर्णा भविष्यन्ति मद्भक्तेषु गतेषु च ।
मद्भक्तशून्या पृथिवी कलिग्रस्ता भविष्यति ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२८ अः ॥
भगवद्भक्तमाहात्म्यं यथा,—
“संस्तुतः कीर्त्तितो वापि दृष्टः स्पृष्टोऽपि वा प्रिये ! ।
पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया ॥”
इति वाराहे उपविभागे प्रबोधिनीमाहात्म्यम् ॥ हरिभक्तकर्त्तव्यानि यथा,—
“हरेश्चरितमीशस्य सर्व्वलोकेषु कीर्त्तनम् ।
वैष्णवेषु च कार्य्येषु भक्तः कुर्य्यादहर्निशम् ॥
दासीदासांश्च यत्किञ्चित् स्वकीयं वस्तु चात्मनः ।
कृष्णभक्तस्य गार्हस्थ्यं सर्व्वं कृष्णे निवेदनम् ॥”
भक्तस्य लक्षणान्तरं यथा,—
“प्रेम्णा संजातया भक्त्या तनुसुतपुलकाञ्चनः ।
विभर्त्त्यलौकिकं भक्तो वदेद्धसति नृत्यति ॥
परमानन्दयुक्तोऽसौ क्वचिद्गायति नन्दति ।
क्रन्दत्यच्युतभावेन गद्गदेन पुनः पुनः ॥
अनुशीलयति भजेत् गोविन्दमनुमोदते ।
तरेदेवं विष्णुमायां दुस्तरां सुनिमोहिनीम् ॥
सर्व्वत्रेश्वरबुद्ध्या यो भजेदीशं सनातनम् ।
स तत्त्ववादी भक्तश्च सर्व्वभूतसुहृत्तमः ॥”
इति पाद्मोत्तरखण्डे १०१ अध्यायः ॥*॥

भक्तत्यागे दोषो यथा,—
“ब्रह्महत्या गुरोर्घातो गोवधः स्त्रीवधस्तथा ।
तुल्यमेभिर्म्महापापं भक्तत्यागादुदाहृतम् ॥
भजन्तं भक्तमत्याज्यमदुष्टं त्यजतः सुखम् ।
नेह नामुत्र पश्यामि तस्मात् शक्र ! दिवं व्रज ॥”
इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्यानम् ॥
(कृतविभागः । यथा, लीलावत्याम् ।
“भक्तो हरः शुध्यति यद्गुणः स्यात् ॥”)
भक्तकरः, पुं, (भक्तं भजनं करोतीति । कृ+टः ।) कृत्रिमधूपः । यथा, शब्दचन्द्रिकायाम् ।
“हकधूपे भक्तकरो गिरिः स्यात् समगन्धकः ॥”
भक्तकारके त्रि ॥
भक्तकारः, त्रि, (भक्तमन्नं करोतीति । कृ+ “कर्म्मण्यण् ।”३ । २ । १ । इत्यण् ।) पाचकः । भक्तमन्नं करोति पचति यः । तत्पर्य्यायः । सूदः २ औदनिकः ३ गुणः ४ भक्ष्यंकारः ५ सूपकारः ६ सूपः ७ आरालिकः ८ बल्लवः ९ । इति हेमचन्द्रः ॥
भक्तता, स्त्री, भक्तत्वम् । भक्तस्य भाव इत्यर्थे (तल्) तप्रत्ययेन निष्पन्ना ॥
भक्ततूर्य्यं, क्ली, (भक्तस्य तद्भोजनकालस्यावेदकं यद्वा भक्ते तद्भोजनकाले वादनीयन्तूर्य्यम् ।) भोजनकाले वादनीयतूर्य्यम् । तत्पर्य्यायः । नृपमानम् २ । इति त्रिकाण्डशेषः ॥
भक्तदासः, पुं, (भक्तेनान्नमात्रेण दासः ।) पञ्चदशदासान्तर्गतदासविशेषः । यथा,—
“भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः ।
सुभिक्षेऽपि भक्तेनाङ्गीकृतदास्यः ।। इति दायक्रमसंग्रहः ॥ (यथा, मनौ । ८ । ४१५ ।
“ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ ।
पैत्रिको दण्डदासश्च सप्तैते दासयोनयः ॥”)
भक्तमण्डः, पुं,स्त्री, (भक्तस्यान्नस्य मण्डः ।) अन्नाग्ररसः । भातेर माड़ इति भाषा । तत्पर्य्यायः । मासरः २ आचामः ३ निःस्रावः ४ । इत्यमरः ॥ (भक्तस्य भजनशीलस्य मण्डोभूषणम् ।) पिच्छा ५ । इति जटाधरः ॥
भक्तिः, स्त्री, (भज्यते इति । भज+क्तिन् ।) विभागः । सेवा । इति मेदिनी । ते, ३६ ॥ गौणवृत्तिः । भङ्गी । (अनुरागविशेषः । पूज्येष्वनुरागो भक्तिरित्युपदेशः ॥ ईश्वरे परानुरक्तिः । “अथातो भक्तिजिज्ञासा सा परानुरक्तिरीश्वरे ।” इति शाण्डिल्यसूत्रम् ॥ उपासना ॥ परमेश्वरविषये परमप्रेम । उपास्याकाराकारितचित्तवृत्त्यावृत्तिरूपा परिपक्वनिदिध्यासनाख्या श्रवणमननाभ्यासफलभूता अनुरक्तिः ॥ “नहीष्टदेवात् परमस्ति किञ्चित् ।”इति बुद्धिपूर्व्विका चित्तवृत्तिः । सा च परमप्रीत्यधीना ॥ यथा, विष्णुपुराणे । १ । २० । १८-१९ ।
“नाथ ! योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ।
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥”

“हे अच्युत ! त्वयि मे अच्युता ऐकान्तिकी भक्तिरस्तु । एकान्तभक्तिः परमप्रीत्यधीनेति तां प्रीतिं प्रार्थयते येति यादृशी प्रीतिर्विषयेषु आसक्तानां सा तादृशी प्रीतिर्मे हृदयात मापसर्पतु मापयातु हृदये सदा तिष्ठत्वित्यर्थः ॥”
इति तट्टीकायां श्रीधरस्वामी ॥ चन्दनादिभिस्तिलकादिरचना । यथा, रघौ । १३ । ५५ ।
क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पंक्तिः ।
अन्यत्रकालागुरुदत्तपत्रा
भक्तिर्भुवश्चन्दनकल्पितेव ॥”)
श्रद्धा । इति हेमचन्द्रः ॥ (भक्तिविवरणं यथा,—
“भज इत्येष वै धातुः सेवायां परिकीर्त्तितः ।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी ॥
इति गारुड़े २३१ अध्यायः ॥*॥
अथ श्रीमद्भक्तिलक्षणं तृतीये श्रीकापिलेये ।
“देवानां गुणलिङ्गानामानुश्रविककर्म्मणाम् ।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ॥
अथ विशेषलक्षणानि । श्रीगौतमीयतन्त्रे ।
“देवतायाञ्च मन्त्रे च तथा मन्त्रप्रदे गुरौ ।
भक्तिरष्टविधा यस्य तस्य कृष्णः प्रसीदति ॥
तद्भक्तजनवात्सल्यं पूजायाञ्चानुमोदनम् ।
सुमना अर्च्चयेन्नित्यं तदर्थे दम्भवर्ज्जनम् ॥
तत्कथाश्रवणे रागस्तदर्थे चाङ्गविक्रिया ।
तदनुस्मरणं नित्यं यस्तन्नाम्नोपजीवति ॥
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते ।
स मुनिः सत्यवादी च कीर्त्तिमान् स भवेन्नरः ॥”
सप्तमस्कन्धे श्रीप्रह्लादोक्तौ ।
“श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥”
तत्रैव श्रीनारदयुधिष्ठिरसंवादे ।
“श्रवणं कीर्त्तनञ्चास्य स्मरणं महतां गतेः ।
सेवेज्यावनतिर्दास्यं सख्यमात्मनिवेदनम् ॥”
पाद्मे कार्त्तिकमाहात्म्ये श्रीयमधूम्रकेशसंवादे ।
“श्रवणं कीर्त्तनं पूजा सर्व्वकर्म्मार्पणं स्तुतिः ।
परिचर्य्या नमस्कारः प्रेम स्वात्मार्पणं हरौ ॥”
तत्रैवोत्तरखण्डे शिवपार्व्वतीसंवादे ।
“आद्यन्तु वैष्णवं प्रोक्तं शङ्खचक्राङ्कनं हरेः ।
धारणञ्चोर्द्ध्वपुण्ड्राणां तन्मन्त्राणां परिग्रहः ॥
अर्च्चनञ्च जपो ध्यानं तन्नामस्मरणं तथा ।
कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम् ।
तत्पादोदकसेवा च तन्निवेदितभोजनम् ॥
तदीयानाञ्च संसेवा द्वादशीव्रतनिष्ठता ।
तुलसीरोपणं विष्णोर्देवदेवस्य शार्ङ्गिणः ॥
भक्तिः षोड़शधा प्रोक्ता भवबन्धविमुक्तये ॥”
इति च ।
किञ्च ।
“दर्शनं भगवन्मूर्त्तेः स्पर्शनं क्षेत्रसेवनम् ।